Topic न।

नामधातु - 2

काम्यच्।

उपमानादाचारे। ... इच्छायाम्। पुत्रमात्मन इच्छति - पुत्रकाम्यति। पुत्रकाम्यिता।

इच्छा - अर्थ में स्व - सम्बन्धी इच्छा के सुबन्त कर्म के बाद विकल्प से 'काम्यच्' प्रत्यय आता है। इस प्रकार इच्छा - अर्थ में स्व - सम्बन्धी सुबन्त कर्म के तीन रूप बन सकते हैं - (i) 'क्यच्' प्रत्ययान्त रूप (ii) 'काम्यच्' प्रत्ययान्त रूप और (iii) मूल वाक्य - रूप।

'काम्यच्' में चकार इत्संज्ञक है, अतः केवल 'काम्य' ही शेष रहता है। उदाहरण के लिए 'पुत्रकाम्यति' में 'पुत्र अम्' से 'काम्यच्' प्रत्यय और अम् - लोप होकर 'पुत्रकाम्य' रूप बनता है, तब लट् लकार के प्रथम पुरुष एकवचन में तिप्, शप् और पर - रूप होकर 'पुत्रकाम्यति' रूप बनता है।

उपमानादाचारे।

उपमानात्कर्मणः सुबन्तादाचारेऽर्थे क्यच्। पुत्रमिवाचरति - पुत्रीयति छात्रम्। विष्णूयति द्विजम्।

वा० सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः।

अतो गुणे। कृष्ण इव आचरति - कृष्णति। स्व इव आचरति - स्वति। सस्वौ।

अनुनासिकस्य क्विझलोः क्ङिति ।

अनुनासिकान्तस्योपधाया दीर्घः स्यात् क्वौ झलादौ च क्ङिति । इदमिवाचरति - इदामति । राजेव - राजानति । पन्था इव - पथीनति ।

कष्टाय क्रमणे ।

चतुर्थ्यन्तात् कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात् । कष्टाय क्रमते - कष्टायते । पापं कर्तुमुत्सहते, इत्यर्थः ।

शब्द - वैर - कलहाभ्र - कण्व - मेघेभ्यः करणे ।

एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात् । शब्दं करोति - शब्दायते । 'तत्करोति तदाचष्टे' इति णिच् ।

वा० प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च ।

प्रातिपदिकाद्धात्वर्थे णिच् स्यात् । इष्ठे यथा प्रातिपदिकस्य पुंवद्भाव - रभाव - टिलोप - विन्मतुब्लोप - यणादि - लोप - प्र - स्थ - स्फाद्यादेश - भसंज्ञास्तद्वण्णावपि स्युः । इत्यल्लोपः । घटं करोत्याचष्टे वा घटयति ।